प्रसूतिवेदनाश्चैव तरुणीनां व्यथां हरेत् ॥
भूमिकुष्माण्डमूलं वै शालितण्डुलवारिणा ।
सप्ताहं दुग्धपीतं स्यात् स्त्रीणां बहुपयस्करम् ॥
महेन्द्रवारुणीमूललेपात् स्त्रीस्तनवेदना ।
नश्येत् घृतविपक्वा च कार्य्यावश्यं तु पालिका ।
भक्षिता सा महेशान ! योनिशूलं विनाशयेत् ॥
प्रलेपिता कारवेल्लमूलेनैव विनिर्गता ।
योनिः प्रवेशमायाति नात्र कार्य्या विचारणा ॥
नीलीपटोलमूलानि साध्यानि तिलवारिणा ॥
पिष्टान्येषां प्रलेपो वै ज्वालागर्द्दभरोगनुत् ॥
पाठामूलं रुद्र ! पीतं पिष्टं तण्डुलवारिणा ।
पामरोगहरं स्याच्च कुष्ठपानन्तथैव च ॥
वास्पोदकस्य समधु पीतमन्तर्गतस्य वै ।
पामरोगस्य सन्तापनिवृत्तिं कुरुते शिव ! ॥
कदलीसेकुचं पीतं पिष्टा तण्डुलवारिणा ।
स्त्रीणाञ्चैव महादेव ! रक्तस्रावं हि वारयेत् ॥
घृततुल्या रुद्र ! लाक्षा पीता क्षीरेण वै सह ।
प्रदरं हरते रोगं नात्र कार्य्या विचारणा ॥
द्विजयष्टीत्रिकटुकं चूर्णं पीतं हरेच्छिव ! ।
तिलक्काथेन संयुक्तं रक्तगुल्मं स्त्रिया हर ! ॥
कुसुमस्य निबद्धस्य तरुणीनां महेश्वर ! ।
रक्तोत्पलस्य वै कन्दं शर्करातिलसंयुतम् ॥
पीतं सशर्करं स्त्रीणां धारयेत् गर्भपातनम् ।
रक्तस्रावस्य नाशः स्यात् शीतोदकनिषेवनात् ॥
पीतन्तु काञ्जिकं रुद्र ! क्वथितं शरपुंखया ।
हिङ्गुसैन्धवसंयुक्तं शीघ्रं स्त्रीणां प्रसूतिकृत् ॥
मातुलुङ्गस्य वै मूलं कटिबद्धं प्रसूतिकृत् ।
अपामार्गस्य वै मूलं योनिस्थञ्च प्रसूतिकृत् ॥
अपामार्गस्य वै मूले गर्भवत्यास्तु नामतः ।
उत्पाट्यमाने सकले पुत्त्रः स्यादन्यथा सुता ॥
अपामार्गस्य वै मूले नारीणां शिरसि स्थिते ।
गर्भशूलं विनश्येत नात्र कार्य्या विचारणा ॥
कर्पूरमदनफलमधुकैः पूरितः शिव ! ।
योनिः शुभा स्याद्वृद्धाया युवत्याः किं पुनर्हर ! ॥
यस्य बालस्य तिलकः कृतो गोरोचनाख्यया ।
शर्कराकुष्ठपानञ्च दत्तं स स्याच्च निर्भयः ॥
विषभूतग्रहादिभ्यो व्याधिभ्यो बालकः शिव ! ।
शङ्खनाभिवचाकुष्ठलोहानां धारणं सदा ॥
बालानामुपसर्गेभ्यो रुद्र! रक्षाकरं भवेत् ।
पञ्चाङ्गचूर्णं समधु गव्याज्यामलकान्वितम् ॥
सविडङ्गं पीतमात्रं नरं कुर्य्यान्महामतिम् ।
मासैकेन महादेव ! जरामरणवर्ज्जितम् ॥
पलाशबीजं सघृतं तिलमध्वन्वितं समम् ।
सप्ताहं भक्षितं रुद्र ! जरां नयति संक्षयम् ॥
महामलकचूर्णं वै मधुतैलघृतान्वितम् ।
जग्ध्वा मांसं युवा स्याच्च नरो वागीश्वरो भवेत् ॥
शिवामलकचूर्णं वै मधुना उदकेन वा ।
बलानि कुर्य्याच्छालायाः प्रत्यूषे भक्षितं शिव ! ॥
कुष्ठचूर्णं साज्यमधु प्रातर्जग्ध्वा भवेन्नरः ।
साक्षात् सुरभिदेहो वै शीवेद्धंसदृशकम् ॥
माषस्य विदलान्येव वितुषाणि महेश्वर ! ।
घृतभावितशुष्काणि मयसा साधितानि वै ॥

शर्करान्वितपयोभिश्च भक्षयित्वा च कामयेत् ।
स्त्रीणां शतं महादेव ! तद्वृत्त्यान्नात्र संशयः ॥
रससिन्दूरखण्डतैलेन गन्धकेन शुभो भवेत् ।
त्रिफलोदकसंघृष्टो बलवृद्धक्षयाद्भवेत् ॥
दुग्धं वितुषमाषैश्च शिम्बीबीजैश्च साधितम् ।
अपामार्गस्य तैलेन पीतं स्त्रीशतकामकृत्" ॥
इति गारुड़े १९६ अध्यायः ॥ * ॥

हरिरुवाच ।

"या गौर्दुंष्टि स्वकं वत्सं तस्या देयं स्वकं पयः ।
लवणेन समायुक्तं तस्या वत्सः प्रियो भवेत् ॥
शुनोऽस्थि कण्ठबद्धं हि महिषीणां गवान्तथा ।
कृमिजालं पातयति सकलं नात्र संशयः ॥
गोजङ्घाभिपातः स्यात् गुञ्जामूलस्य भक्षणात् ।
वरुणफलस्य रसं करेण मथितं शिव ! ॥
चतुष्पादद्विपदयोः कृमिजालं निपातयेत् ।
व्रणञ्च शमयेद्रुद्र ! यवानां पूरणात्तथा ॥
गजमूत्रस्य वै पानं गोमहिषुपसर्गनुत् ।
समसूरं शालिबीजं पीतं तक्रेण घर्षितम् ॥
क्षीरं गोमहिषस्यैव गोः पुंसस्य हितं भवेत् ।
पचच्च शरपुंखाया दत्तं सलवणं शिव ! ॥
वारिस्फोटं हयानाञ्च वेशराणां विनाशयेत् ।
अश्वाश्च सुन्दरच्छाया भवन्ति च न संशयः ॥
म्लहकुमारीपत्रं वै दत्तं सलवणं हर ! ।
तुरङ्गमवेशराणां कण्डुनुत् स्याद्शाहतः" ॥
इति गारुड़े १९७ अध्यायः ॥ * ॥

हरिरुवाच ।

"चित्रकस्याष्टभागानि शूरणस्य च षोड़श ।
शुण्ठ्याश्चत्वारि भागानि मरीचानां द्वयं तथा ॥
पिप्पली पिप्पलीमूलं विड़ङ्गानां चतुष्टयम् ।
अष्टौ मुषलीभागाश्च त्रिफलायास्तुष्टयम् ॥
द्विगुणेन गुड़ेनैषां मोदकानि हि कारयेत् ।
तद्भक्षणमर्शांसि हि पाण्डुरोगञ्च कामलाम् ॥
अतिशोथं च मन्दाग्निं श्लीहादञ्च निवारयेत् ।
विल्वाग्निमन्थश्योनाकपाटलापारिभद्रकम् ॥
प्रसारण्यश्वगन्धा च वृहती कण्टकारिका ।
बला चातिबला रास्ना श्वदंष्ट्रा च पुनर्णवा ॥
एरण्डशारिवा पर्णी गुड़ूची कपिकच्छुरा ।
एषां दशपलान् भागान् क्वाथयेत् सलिलेऽमले ॥
तेन पादावशेषेण तैलपात्रे विपाचयेत् ।
आजं वा यदि वा गव्यं क्षीरं दत्त्वा चतुर्गुणम् ॥
शतावरीरसञ्चैव तैलतुल्यं प्रदापयेत् ।
द्रव्याणि यानि पेष्याणि तानि वक्ष्यामि तच्छृणु ॥
शतपुष्पा देवदारु बला पर्णी वचागुरु ।
कुष्ठं मांसी सैन्धवञ्च पलमेकं पुनर्णवा ॥
पाने नस्ये तथाभ्यङ्गे तैलमेतत् प्रदापयेत् ।
हृच्छूलं पार्श्वशूलञ्च गण्डमालाञ्च नाशयेत् ॥
अपस्मारं वातरक्तमाशुघ्नांश्च पुमान् भवेत् ।
गर्भमश्वतरी विन्द्यात् किं पुनर्मानुषी शिव ! ॥
अश्वानां वातभग्नानां कुञ्जराणां नृणां तथा ।
तैलमेतत् प्रयोक्तव्यं सर्व्ववातविकारिणाम् ॥
हिङ्गु तुम्बुरु शुण्ठ्या च साध्यं तैलन्तु सार्षपम् ।
एतद्धि पूरणं श्रेष्ठं कर्णशूलापहं परम् ॥

शुष्कमूलकशुण्ठीनां क्षारो हिङ्गुलनागरम् ।
शुष्कं चतुर्गुणं दद्यात्तैलमेतैर्विपाचयेत् ॥
वाधिर्य्यं कर्णशूलञ्च पूयस्रावञ्च कर्णयोः ।
क्रमयश्च विनश्यन्ति तैलस्यास्य प्रपूरणात् ॥
शुष्कमूलकशुण्ठीनां क्षारो हिङ्गुलनागरम् ।
शतपुष्पी वचा कुष्ठं दारु शिग्रु रसाञ्जनम् ॥
सौवर्च्चलं यवक्षारं सामुद्रं सैन्धवं तथा ।
भुजग्रन्थि विड़ं मुस्तं मधु शुक्तं चतुर्गुणम् ॥
मातुलुङ्गरसञ्चैव कदलीरसमेव च ।
तैलमेभिर्विपक्वाथं कर्णशूलापहं परम् ॥
व्याधिजः कर्णनादश्च पूयस्रावश्च दारुणः ।
पूरणादस्य तैलस्य क्रमयः कर्णयोः खिलाः ॥
क्षिप्रं विनाशमायान्ति शशाङ्कहतशेखर ! ।
क्षारतैलमिदं श्रेष्ठं मुखदन्तामयापहम् ॥
चन्दनं कुङ्कुमं मांसी कर्पूरो जातिपत्रिका ।
जातीकक्कोलपूगानां लवङ्गस्य फलानि च ॥
अगुरुशीरकस्तुर्य्यः कुष्ठं.तगरनालिका ।
गोरोचना प्रियङ्गुश्च चोलो दमनकं नखम् ॥
सरलः सप्तपर्णश्च लाक्षा चामलकी तथा ।
कर्पूरकः पद्मकश्च एतैस्तैलं प्रसाधितम् ॥
प्रस्वेदमलदौर्गन्ध्यकण्डुकुष्ठहरं परम् ।
पुमान् युवा स्यात् शुक्राढ्यः स्त्रीणां चात्यन्तदुर्ल्लभः ।
स्त्रीशतं गच्छते रुद्र ! वन्ध्यापि लभते सुतम् ॥
यमानी चित्रकं धान्यं त्र्यूषणं जीरकं तथा ।
सौवर्चलं विड़ं वर्च्यं पिप्पलीमूलराजिकम् ।
एभिः पचेत् घृतप्रस्थं जलप्रस्थाष्टसंयुतम् ॥
मर्म्माशोगुल्मश्वयथुं हन्ति वह्निं करोति वै ॥
मरीचं त्रिवृतं कुष्ठं हरितालं मनःशिला ।
देवदारुहरिद्रे द्वे कुष्ठं मांसी च चन्दनम् ।
विशाला करवीरञ्च अर्कक्षीरं शकृद्रसम् ॥
एषाञ्च कार्षिको भागो विषस्यार्द्धपलं भवेत् ।
प्रस्थं कटुकतैलस्य गोमूत्रेऽष्टगुणे पचेत् ॥
मृत्पात्रे लौहपात्रे वा शनैर्मृद्वग्निना पचेत् ।
पामा विचर्च्चिका चैव दद्रुविस्फोटकानि च ॥
अभ्यङ्गेन प्रणश्यन्ति कोमलत्वञ्च जायते ।
प्रसूतान्यपि श्वित्राणि तैलनानेन म्रक्षयेत् ॥
चिरोत्थितमपि श्वित्रं विवर्णं तत्क्षणाद्भवेत् ।
पटोलपत्रं कटुका मञ्जिष्ठा शारिवा निशा ॥
जाती शमी निम्बपत्रं मधुकं क्वथितं घृतम् ।
एभिर्लेपात् स्युरुजो व्रणा वै स्राविणः शिव ! ॥
शङ्खपुष्पी वचा सोमा ब्राह्मी ब्रह्मसुवर्चला ।
अभया च गुड़ूची च अटरूषकवाकुची ॥
एतैरक्षसमैर्भागैर्घृतप्रस्थं विपाचयेत् ॥
कण्टकार्य्या रसं प्रस्थं क्षीरप्रस्थसमन्वितम् ।
एतद्ब्राह्मीघृतं नाम स्मृतिमेधाकरं परम् ॥
अग्निजिह्वा वचा वासा पिप्पली मधु सैन्धवम् ।
सप्तरात्रप्रयोगेण किन्नरैः सह गीयते ॥
अपामार्गो गुड़ूची च कुष्ठं शतावरी वचा ।
शङ्खपुष्प्यभया साज्यं विड़ङ्गं भक्षितं समम् ।
त्रिभिर्दिनैर्नरं कुर्य्याद्ग्रन्थाष्टशतधारिणम् ॥
अद्भिर्वा पयसाज्येन मासमेकन्तु सेविता ।
वचा कुर्य्यान्नरं प्राज्ञं श्रुतिधारणसंयुतम् ॥